पेपर १

**गुणा : ८०** **कक्षा : द्वादशी**


**सूचना :**

| | |
|---|---|
| (१) | सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् । |
| (२) | यथासूचनम् आकलनकृतय: व्याकरणकृतय: च आरेखितव्या: । |
| (३) | आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम् । |
| (४) | रिक्तस्थानपूरणे युज्यमाना: शब्दा: अधोरेखितव्या: । |

## प्रथमः विभाग : - सुगम संस्कृतम् (०६)

**प्र. १ (अ) चित्रं दृष्ट्वा व्यावहारिकसूचनाः संस्कृत - भाषया लिखत ।** (०३)

१.



२.



३.



**(ब) व्यावहारिकशब्दञ्जूषातः शब्दं चित्वा उचितस्तम्भे लिखत । (८ तः ६)** (३)

| वाद्यम् | नाट्यम् | क्रीडा |
|---|---|---|
| | | |

**मञ्जूषा -** किङ्किणी, लक्ष्यवेधनम्, शततन्त्री, उत्कर्षबिन्दुः, संहिता, मोक्षपटः, तूर्यम्, रङ्गसूचना

## द्वितीयः विभागः - पद्यम् । (१२)

**प्र. २ (अ.) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।** (४)

उष्ट्राणां च विवाहेषु गीतं गायन्ति गर्दभा: ।
परस्परं प्रशंसन्ति "अहो रूपम् !" "अहो ध्वनि: ।" ॥

तृणाल्लघुतरस्तूलस्तूलादपि च याचक: ।
वायुना किं न नीतोऽसौ मामयं प्रार्थयेदिति ॥

वास: प्रधानं खलु योग्यताया वासोविहीनं विजहाति लक्ष्मी: ।
पीताम्बरं वीक्ष्य ददौ स्वकन्यां दिगम्बरं वीक्ष्य विषं समुद्र: ॥

**(१) अवबोधनम् (३ तः २)** (२)

१. **उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत ।**

उष्ट्राणां विवाहेषु - __________ ।

अ. गर्दभा: रूपं प्रशंसन्ति ।

ब. गर्दभा: ध्वनिं प्रशंसन्ति ।

२. **उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।**


वायुना असौ न नीतः - [ ]

३. **वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत ।**

याचकात् तूलः लघुतरः अस्ति । __________

**(२) पृथक्करणम् ।** (२)

**जालरेखाचित्रं पूरयत ।**




**प्र. २ (ब.) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।** (४)

> गोदावरीरोधसि रामचन्द्रः समाश्रयन् पञ्चवटीं मनोज्ञाम् ।
> उवास वन्यामलम्ब्य वृत्तिं सहानुजो यत्र सुखं सदारः ॥
>
> भक्तव्रजस्तालमृदुङ्गनादैर्गर्जन्मुहुर्विठ्ठल - विठ्ठलेति ।
> आषाढमासे प्रतिवर्षमत्र क्षेत्रं समागच्छति पौण्डरीकम् ॥
>
> महालसाख्यां क्वचिददादधाति यत्र क्वचिद्विन्दति रेणुकाख्याम् ।
> लक्ष्मीस्वरूपा क्वचिदादिशक्तिः क्वचिद् भवानी तुलजापुरस्था ॥

**१) अवबोधनम् । (३ तः २)** (२)

१. **पूर्णवाक्येन उत्तरत ।**

भक्तव्रजः पौण्डरीकं क्षेत्रं कदा समागच्छति ?

२. **रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरूत ।**

<u>रामचन्द्रः</u> वन्यां वृत्तिमवलम्ब्य उवास ।

३. **उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।**

रामचन्द्रस्य निवासस्थानम् - [ ]

**२) शब्दज्ञानम् । (३ तः २)** (२)

१. **सन्धिविग्रहं कुरूत ।**

क्वचिदादधाति -

२. **नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।**

भक्तव्रजः <u>तालमृदङ्गनादै</u> गर्जन् मुहुः विठ्ठल - विठ्ठलेति । (तद्)

३. **पद्यांशं पठित्वा - सप्तमी विभक्त्यन्त - पदे चित्वा लिखत ।**

**प्र. २ (क) पद्यांशं पठित्वा अन्वयपूर्तिं कुरूत ।** (४)

पद्मे मूढजने ददासि विभवं विद्वत्सु किं मत्सरः ?
नाहं मत्सरिणी, न चापि चपला नैवास्ति मूर्खे रतिः ।
मूर्खेभ्यो द्रविणं ददामि नितरां तत्कारणं श्रूयताम्
विद्वान्सर्वजनेषु पूजिततमो मूर्खस्य नान्या गतिः ॥

**अन्वयः** - (भक्तः वदति) पद्मे, मूढजने विभवं ददासि, ________ मत्सरः किम् ? (लक्ष्मीः वदति), "अहं न ________, न च अपि _____, न __(मम) मूर्खे रतिः अस्ति । (अहं) _________ नितरां द्रविणं ददामि, तत्कारणं _____ । सर्वजनेषु विद्वान् ________, मूर्खस्य ___________ गतिः न ।"

**तृतीयः विभागः - गद्यम् ।** (९)

**प्र. ३ (अ.) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।**

प्रसाधनं नाम मानवजीवनस्य महत्त्वपूर्णम् अङ्गम् । न केवलं अद्यतनीये काले, अपि तु प्राचीनकालेऽपि जगत्यस्मिन् सर्वत्र सर्वे स्त्रीपुरूषाः प्रसाधनप्रियाः । वेदादिषु, ऋतुसंहार - मेघदूत - गाहासत्तसई - आदिषु संस्कृत-प्राकृतकाव्येषु तथा मानसोल्लास - बृहत्संहितादिषु शास्त्रग्रन्थेषु प्रसाधनकला वर्णिता । बौद्धवाङ्मये ललितविस्तरादिषु ग्रन्थेष्वपि प्रसाधनानां बहवः सन्दर्भाः प्राप्यन्ते । पुरातने कालेऽपि सौन्दर्यस्पर्धानाम् आयोजनं भवति स्म यथा 'जनकल्याणपदी' (Lady of the land) 'नगरसौभिनी' (Beauty of the town) । चित्रशिल्पेषु नैकविधाः प्रसाधनपराः जनाः दृश्यन्ते । तथा उत्खननेषु अपि प्राचीनानि प्रसाधनसाधनानि प्राप्तानि । अनेन सुष्ठु ज्ञायते, यद् अतिप्राचीनकालादेव भारते न केवलं स्त्रियः, किन्तु पुरूषाः अपि प्रसाधनकलायां निपुणाः । तदर्थं विविध-प्रसाधनसाहित्यस्य प्रभूतम् उपयोजनं भारतीयाः कृतवन्तः । याः चतुष्षष्टिकलाः सुविदिताः, तास्वपि नैकाः प्रसाधनकलाः निर्दिष्टाः ।

१) **अवबोधनम् । (३ तः २)** (२)

१. **चतुष्कोणं पूरयत ।**

गाहासत्तसई - मध्ये वर्णिता - [ ]

२. **वाक्यं पुनर्लिखित्वा 'सत्यम्/असत्यम्' इति लिखत ।**

कलाः षट्चत्वारिंशत् सुविदिताः ।

३. **उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

प्रायः सर्वे जनाः प्रसाधनं कुर्वन्ति, यतः _________ ।

अ. जनाः प्रसाधनप्रियाः ।

आ. प्रसाधनैः विना जीवितुं न शक्यते ।

२) **शब्दज्ञानम् । (३ तः २)** (२)

१. **'अद्यतनीयकाले' इत्यस्य विरूद्धार्थकपदं लिखत ।**

२. **गद्यांशं पठित्वा पञ्चम्यन्तं पदं चित्वा लिखत ।**

३. **सन्धिविच्छेदं कुरूत ।**

ग्रन्थेष्वपि

**प्र. ३ (ब.) माध्यमभाषया ससन्दर्भं स्पष्टीकुरूत । (२ तः १)** (५)

१. निवृत्तपरिहारान् पितेवानुगृह्णीयात् ।

२. एतद् बालशौण्डीर्यं दृष्ट्वा अहं सौभद्रं स्मरामि ।

## चतुर्थः विभागः - नाट्यकलशः । (१३)

**प्र. ४ (अ.) नाट्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।** (४)

बालः - जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये ।

प्रथमा - अविनीत, हन्त, वर्धते तव संरम्भः । स्थाने खलु ऋषिजनेन 'सर्वदमन' इति कृतनामधेयोऽसि ।

राजा - (आत्मगतम्) किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः ? नूनमनपत्यता मां वत्सलयति ।

प्रथमा - वत्स, एनं बालमृगेन्द्रं मुंञ्च । अपरं ते क्रीडनकं दास्यामि ।

सर्वदमनः - कुत्र ? देह्येतत् । (इति हस्तं प्रसारयति)

राजा -कथं चक्रवर्तिलक्षणमप्यनेन धार्यते ।

द्वितीया - सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम् । गच्छ त्वम् । मदीये उटजे मृत्तिकामयूरस्तिष्ठति । तमस्योपहर ।

प्रथमा - तथा । (इति निष्क्रान्ता)

१) **अवबोधनम् । (३ तः २)** (२)

१. **उचितं कारणं चित्वा वाक्यं पुनर्लिखत** । बालकः सिंहाय जृम्भितुं कथयति, यतः - ____________।

अ. सः सिंहस्य दन्तान् उत्पाटयितुम् इच्छति ।

आ. सः सिंहस्य दन्तान् गणयितुम् इच्छति ।

२. **उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।**

चक्रवर्तिलक्षणं धारयति - [ ]

३. **वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत ।**

तपस्याः उटजे काष्ठमयूरः तिष्ठति । _________।

२) **शब्दज्ञानम् । (३ तः २)** (२)

**१. सन्धिविच्छेदं कुरूत ।**

कृतनामधेयोऽसि - ___________।

२. **नाट्यांशात् तुमन्त - अव्ययं चित्वा लिखत ।**

३. **विरूद्धार्थकं शब्दं लिखत ।**

अविनीत X ______ ।

**प्र. ४ (ब.) नाट्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत ।** (४)

(परिव्राजकः प्रविशति ।)

परिव्राजकः - शाण्डिल्य, शाण्डिल्य (पृष्ठतः विलोक्य) न तावत् दृश्यते । न जाने निद्रावश गतः । भवतु, एकमात्रः, शिष्यः, दृढ परिपालरुितव्य ।

शाण्डिल्यः - भोः, क्षुधा मां बाधते । अस्माकं गेहे अशननाशेन अतीव बुभुक्षितः अहं भिक्षालोभेन अस्य दुष्टाचार्यस्य भाण्डभारगर्दभः संवृत्तः । का गतिः । भगवन्तम् एव अनुसरामि । एष खलु भगवान् । (उपगम्य) क्षम्यतां, क्षम्यतां भगवन् ।

परिव्राजकः - न भेतव्यम् । आगच्छ, अध्ययनकालः इदानीम् ।

शाण्डिल्यः - अपसार्य अध्ययनं, भिक्षार्थमेव गच्छावः ।

परिव्राजकः - मूर्ख, प्रातःकालः अयम, न भिक्षावेला । तस्माद् अध्ययनार्थम् इदमुद्यानं प्रविशावः ।

शाण्डिल्यः - प्रथमः कल्पः । (उद्यानं प्रविश्य) अहो रमणीयं खलु इदमुद्यानम् ।

परिव्राजकः - इह एव आसिष्यावहे । आगच्छ वत्स, अधीष्व तावत् ।

शाण्डिल्यः - न तावत् अधीष्ये । अध्ययनेन किं भवति ?

परिव्राजकः - अध्ययनेन अष्टसिद्धयः लभ्यन्ते ।

शाण्डिल्यः - अष्टसिद्धयः इति ? भगवन्, तेन त्वं परदेहं परगेहं च प्रवेष्टुं समर्थः भवसि ?

परिव्राजक :- अथ किम् । छिद्यताम, एषा कथा । तूष्णीं स्थित्वा योगं चिन्तयावः ।

**१) अवबोधनम् । (३ तः २)** (२)

१. **पूर्णवाक्येन उत्तरत ।**

अध्ययनेन किं भवति ?

२. **चतुष्कोणं पूरयत ।**

शाण्डिल्यस्य बुभुक्षितायाः कारणम् - ☐

३. **प्रश्ननिर्माणं कुरूत अधोरेखितः शब्दम् आधृत्य ।**

त्वं <u>परदेहं परगेहं</u> च प्रवेष्टुं समर्थः भवसि ।

**२) पृथक्करणम् ।** (२)

**क्रमेण योजयित्वा वाक्यानि पुनर्लिखत ।**

१. वसन्तसेनायाः उद्यानागमनम् ।

२. परिव्राजकस्य शाण्डिल्यस्य च उद्यानप्रवेशः ।

३. गणिकादर्शनेन शाण्डिल्यस्य आनन्दः ।

४. परिव्राजकस्य योगचिन्तनविषये आदेशः ।

**प्र. ४ (क.) माध्यमभाषया ससन्दर्भं स्पष्टीकुरूत । (२ तः १)** (५)

१. विद्वन् षण्मुख का गतिर्मम चिरं मूर्ध्नि स्थितायां वद ।

२. निर्वचनस्य पञ्च विधाः सन्ति ।

**पञ्चमः विभागः - साहित्य परिचयः साहित्यविशेषः च ।** (८)

**प्र. ५ उचितं विकल्पं चित्वा वाक्यानि पुनर्लिखत । (१० तः ८)**

१. पुराभिलेखानां ________ प्रकाराः सन्ति ।
(दश, त्रयः, पञ्च)

२. मालवादीनां गणराज्यानां परिचयः ________एव जातः ।
(हस्तलिखितैः, प्रतिमाभिः, नाणकैः)

३. प्रासादमण्डनम् इति - ________ विषयकः ग्रन्थः ।
(स्थापत्यशास्त्र, पुरातत्त्वशास्त्र, प्रतिमाविद्या)

४. अङ्कोर - मन्दिर - समूहः ________ देशे वर्तते ।
(कम्बोडिया, बाली, श्रीलंका)

५. 'वेसर' इति ________पद्धतिः ।
(मन्दिरनिर्माणस्य, नाणकशास्त्रस्य, नगरनिर्माणस्य)

६. साधनमाला - रूपावतार - प्रभृतयः ग्रन्थविशेषाः ________ विशदीकुर्वन्ति ।
(चित्रनिर्माणं, लेखनिर्माणं, मूर्तिनिर्माणं)

७. १९३७ तमे वर्षे ________ विशदीकृता ।
(ब्राह्मीलिपी, शारदालिपी, ग्रन्थलिपी)

८. डॉ. वा. वि. मिराशी महोदयेन पुराभिलेखविद्यासाहाय्येन ________ कालनिर्णयः कृतः ।
(अश्वघोषस्य, भवभूतेः, बाणस्य)

९. शक-क्षत्रप-कुशाणादयः ________ ।
(राजवंशाः, सङ्घराज्याः, गणराज्याः)

१०. चित्रकलाशिल्पकलादयः विषयाः अपि ________समाविष्टाः ।
(प्रतिमाविद्यायां, भारतविद्यायां, पुराभिलेखविद्यायां)

**षष्ठः विभागः - लेखनकौशलम् ।** (१६)

**प्र. ६ अधोनिर्दिष्टे कृतीः कुरूत । (३ तः २)**

**मंञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा चित्रपःवर्णनं पुनर्लिखत ।**

**द लायन किङ्ग**

प्रकारः - अनुप्राणितचित्रपटः ।

भाषा - आङ्ग्लभाषा ।

लेखनम्ः - इरेन्, जोनाथन् लिण्डा ।

दिग्दर्शनम्ः - जॉन्, फैवरो ।

'वाल्ट-डिस्ने' नाम्ना ______ निर्मितस्य चित्रपटस्य पुनः प्रस्तुतिः इयम् । मुफासा, सिम्बा, स्कार, टैमन, पुम्बा इत्यादयः पशवः ________वनप्रदेशे निवसन्ति । राज्यस्य कृते तेषां सङ्घर्षः अत्र वर्णितः ।

अनुप्राणितपटेषु ______कौशलं तु मौलिकमेव । किन्तु, पार्श्वनिवेदकानाम् अपि कौशलम् अतीव महत्त्वपूर्णं भवति । यत: तेषां स्वराणां माध्यमेन ______ कथाम् आस्वादयन्ति । _____ मॅथ्यू - ब्रोडरिक् तथा जेम्स् - अर्ल् - जोन्स इति द्वौ ____। अस्य चित्रपटस्य हिन्दीसंस्करणे तु विख्यातः अभिनेता शाहरूखखानः च तस्य पुत्रः आर्यनखानः च __________ कृतवन्तौ । एतदपि अस्य चित्रपटस्य भारते ___________ कारणम् ।

(मंजूषा - आङ्ग्लभाषापटे, आफ्रिकाखण्डे, तन्त्रज्ञानां, निर्मितिसंस्थया, पार्श्वनिवेदकौ, पार्श्वनिवेदनं, लोकप्रियतायाः, रसिकाः)

**अथवा**

**निन्त्रणपत्रिकायाः आधारेण संस्कृतभाषया वृत्तान्तलेखनं कुरूत ।**

**संस्कृतदिनम् - १**

**निमन्त्रणम्**

**।। संस्कृतेन हि संस्कृतिः ।।**

**सरोजिनी - विद्यालयः, मुरबाडग्रामः**

आयोजयति

**संस्कृतदिनानिमित्तेन**

**संस्कृतवृन्दसङ्गीतम्**

(छात्राणां-संस्कृत-गीत-नृत्य-प्रस्तुतीकरणम्)

**प्रमुखातिथिः** - कु.विनी डिमेलो । (लोकप्रिया बालगायिका)

**अध्यक्षा** - प्रा.सिसिलिया लोबो (प्राचार्या)

**स्थलम्** - त्रिवेणी सभागृहम्, मुरबाडग्रामः ।

**समयः** - सायम् ५.०० तः ८.०० । दि. १८ ऑगस्ट २० .......

रसिकवराणाम् उपस्थितिः प्रार्थनीया ।

**संयोजकाः** -

**नदीमः इब्राहिमः**
संस्कृतशिक्षकः
nadim784@gmail.com

**नीला गुर्जर**
सङ्गीतशिक्षिका
९६xxxxxx८५

**सलोनी खारकरः**
छात्र प्रमुखा
८४xxxxxx७५

**अधोदत्तेषु एकं विषयम् अधिकृत्य संस्कृतभाषया ८-१० वाक्येषु निबन्धलेखनं कुरूत ।**

१. परोपकारः । २. मम प्रियः क्रान्तिवीरः । ३. महाराष्ट्रदेशः ।

**सप्तमः विभागः - भाषाभ्यासः ।** **(१२)**

**प्र. ७ अधोनिर्दिष्टाः कृतीः कुरूत । (५ तः ४)**

**अ. नामतालिकां पूरयत । (८ तः ६)** (३)

| | नाम | प्रातिपदिकम् | अन्तम् | लिङ्गम् | विभक्तिः | |
|---|---|---|---|---|---|---|
| १. | सद्मनि | सद्मन् | | | सप्तमी | एकवचनम |
| २. | अम्ब | | आकारान्त | स्त्रीलिङ्गम् | | एकवचनम् |
| ३. | राष्ट्रवादिनाम् | राष्ट्रवादिन् | | पुंल्लिङ्गम् | षष्ठी | |
| ४. | प्राणान् | | अकारान्त | पुंल्लिङ्गम् | द्वितीया | |

**आ. समासतालिकां पूरयत । (८ तः ६)** (३)

| | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १. | असन्तः | न सन्तः । | |
| २. | स्तुतिकन्या | | कर्मधारयः । |
| ३. | | तुळजापुरे तिष्ठति सा | उपपद तत्पुरूषः । |
| ४. | सानिलः | अनिलेन सह | |
| ५. | | शरसः मर्दनम् | षष्ठी तत्पुरूषः । |
| ६. | प्रतिदिनम् | दिने दिने | |
| ७. | | कोषं गताः | द्वितीया तत्पुरूषः । |
| ८. | स्नानार्थम् | | चतुर्थी तत्पुरूषः । |

**इ. तद्धितान्तकृदन्तयोः स्तम्भपूरणम् । (८ तः ६)** (३)

**मञ्जूषा** - (उद्योगी, आवृत्तिः, निरनुक्रोशः, बाह्मम्, प्रणन्ता, रतिः, धैर्यम्, स्वाभाविकम्)

| तद्धितान्ताः | कृदन्ताः |
|---|---|
| | |

**ई. समानार्थकशब्दं लिखत । (८ तः ६)** (३)

१. वीचिः - २. आयुधम् - ३. शरीरम् -

४. वह्निः - ५. दर्पणः - ६. षण्मुखः -

७. शकुन्तः - ८. पद्मा -

**उ. सूचनानुसारं परिवर्तय । (५ तः ३)** (३)

१. प्रसाधनकलायाः षोडश अङ्गानि सन्ति । (लङ्लकारे परिवर्तय)

२. भारतीयभाषाः देवीं सरस्वतीम् अगच्छन् । (द्विवचने परिवर्तय)

३. यत्ने कृते न सिध्यति चेत् कोऽत्र दोषः ? (सति - सप्तमी - रचनां निष्कासयत)

४. किं त्वया एषः मानुषः आनीतः । (वाच्यं परिवर्तय)

५. भक्तव्रजः क्षेत्रं समागच्छति विठ्ठलं भजति च । (पूर्वकालवाचकं योजयत ।)

**अष्टमः विभागः - अपठितम् ।**

**प्र. ८ संस्कृतवाक्यानां माध्यमभाषया अनुवादं कुरूत । (६ तः ४)** (४)

१. नवदम्पत्योः वैवाहिकजीवनं सुखदं भवतु ।

२. वृद्धान् सेवमानस्य युवकस्य साहाय्यं कुर्मः ।

३. बहुभिः गीतायाः उदाहरणैः गुरूणा सः बोध्यते ।

४. अनया लिखितानि चित्राणि सुन्दराणि सन्ति ।

५. शिवखानयोः मेलनस्थानं शिबिरात् दूरे उत्तुङ्गस्य दुर्गस्य अधः एकस्मिन् पटगृहे निश्चितम् ।

●●●